International Journal of Research in Social Sciences
Vol. 8 Issue 10, October 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

न्याय शास्त्रे ईश्वरानुमाननिरास:

डॉ. पीताम्बर मिश्र:

न बाधोऽस्योपजीव्यत्वात् प्रतिबन्ध: न दुर्बलै: ।
सिद्धयसिद्धयोर्विरोधो नो नासिद्धिरनिबन्धना ।।[१]

इति उदयनाचार्यैरुक्तम् । तदर्थस्तु ईश्वरस्याासिद्धौ ईश्वरनास्तित्वतदकर्तृत्वतच्छरीरत्वसाधकै: अनुमानै: ईश्वरानुमानस्य बाधो न सम्भवति, तत्र पक्षभूतस्य ईश्वरस्यैवासिद्धत्वात् । अनुमान-सिद्धमीश्वरं पक्षीकृत्य तन्निरसनन्तु न सम्भवति । धर्मिग्राहकप्रमाणेन ईश्वरानुमानेनैव प्रतिपक्षानु-मानस्य बाधितत्वात् ।

न हि दुर्बलानि प्रतिपक्षानुमानानि ईश्वरानुमानं बाधितुं प्रभवन्ति । यद्ययं कार्यत्वहेतु: घटादौ शरीरादिमत्कर्तृकत्वव्याप्तो दृष्ट: इति पक्षेऽपि क्षित्यङ्कुरादौ शरीरादिमत्कर्तृकत्वमेव साधयति इत्युच्यते । तदा अस्माकं न विरोध: ।[२]

यदि क्षित्यङ्कुरादौ शरीरिकर्तृकत्वादिकं योग्यानुपलब्धिपराहतमित्ययं कार्यत्वहेतु: शरीरादिकं न साधयेत् इत्युच्यते, तदा अशरीरत्वे ईश्वरस्य न कोऽपि विरोध: । एतदेवोच्यते सिद्धयसिद्धयोर्विरोधो नो इति[३] । एवं व्याप्ते: अन्वयव्यतिरेकाभ्यां भूयोदर्शनेन च गृहीतत्वात् व्याप्यत्वासिद्धि: न दोष: इति ईश्वरानुमानं निर्दुष्टमिति नैयायिकमतम् ।

अत्र सिद्धान्त: । विरोधो सिद्धे निषेधस्यानुपपन्नत्वादसिद्धे च निरोधेऽसत: निषेधस्यासम्भवाच्च[४] । एतदेव श्लोकेन उक्तम्–

सिद्ध्यसिद्ध्योर्विरोधो नेत्येवं प्रलपतस्तव ।

विरोधसिद्ध्यसिद्ध्योश्च तन्निषेधो निषिध्यते ।।[५]

किञ्च विशेषविरोधोऽपि वक्तव्य: । कर्तृत्वस्य शरीरित्वेन व्याप्तत्वात् शरीरित्वविरोधात् अशरीरित्वरूपविशेषस्य विरोधो भवति । यदि घटादिविलक्षणस्य अङ्कुरादे: पक्षीकरणात् लोकदृष्टविलक्षण: शरीरानपेक्षनित्यज्ञानादिमान् कर्ता सिद्ध्येत् । तदा ''हिममग्निमत् तृणादि-मर्मरीभावहेतुत्वात्'' इत्यनुमानेन सिद्ध्यन्नाग्नि: पक्षीभूतहिमे पक्षधर्मताबलात् शीताग्नि: सिद्ध्येत् ।[६] अयं विषय: शास्त्रदीपिकायामपि प्रतिपादित: ।

तृणादिमर्मरीभावहेतुत्वादग्निमद्धिमम् ।

इति कृत्वा पक्षबलात् शीताग्निर्नहि कल्प्यते ।।[७]

व्यापकत्वेन दृष्टस्य पक्षसम्बन्धमात्रत: ।

अधिकांशग्रहे हेतु: पक्षधर्मोऽपि न क्षम: ।।[८] इति ।

अनेन क्षित्यादिषु कार्यत्वेन हेतुना ज्ञानादिकमेव सिद्ध्येत् । न तु तस्य नित्यत्वसर्व-विषयकत्वशरीरानवच्छिन्नत्वादिकमिति लभ्यते । यदि कार्यत्वेन हेतुना क्षित्यादौ तद्धेतुभूतं ज्ञानादिकमेव सिद्ध्यति चेदपि अधिकांश: नित्यत्वादि: परिशेषादिना सेत्स्यति इत्युच्यते । तदापि परिशेषानुमानस्य दुर्वचत्वं दोष: ।[९]

ननु सपक्षे साध्यं यादृशरूपविशिष्टं दृष्टं तादृशरूपस्य नि:शेषतया भङ्ग: अभिप्रेत: । तेन प्रकृते सपक्षे घटादौ असर्वज्ञशरीरिकर्त्तृकत्वादिरूपस्य दर्शनेऽपि पक्षे तद्रूपस्य त्याग: एवेति क्षित्यादिकर्तु: सर्वज्ञत्वे अशरीरत्वे च न दोष इति चेन्न

। सपक्षे साध्यं यादृशं दृष्टं तद्विलक्षणस्य पक्षे साधने ज्ञानचिकीर्षादिकमपि क्षित्यादिहेतुतया न सिद्ध्येत् । तादृशस्यैव साध्यस्य साधने कर्तु: शरीरनिरपेक्षनित्यज्ञानवत्त्वं न सिद्ध्येत् ।[१०]

दृष्टजातीयनिश्शेषभङ्गे साध्यं न सिद्ध्यति ।
अभङ्गे नाधिकं सिद्ध्येत् न च सामान्यत: स्थिति: ।।[११]

'न च सामान्यत: स्थिति:' इत्यस्य एवं व्याख्यानं कृतं रङ्गरामानुजस्वामिभि: - अनुभूति-स्मृतिहेत्वजन्यत्वेन गुणदोषाजन्यत्वेन च ईश्वरज्ञानस्य भ्रमप्रमानुभूतिस्मृतिवैलक्षण्यप्रसङ्गात् निर्विशेषसामान्याभावाच्च ज्ञानसामान्यस्य सिद्धि: ईश्वरानुमानेन वक्तुं न शक्यते ।[१२] इति ।

महामहोपाध्यायकृष्णताताचार्यविरचितायां 'रत्नपेटिकायाम्' 'तृणादिमर्मरीभावहेतुत्वात्' इत्यादिग्रन्थस्य एवं व्याख्यान्तरं कृतम् । तथाहि- यथा महानसीयवह्न्याभाववान् पर्वत: इति बाधजनकदशायां पर्वते वह्निव्याप्यधूमवत्ताज्ञानात् महानसीयेतरवह्निमान्नित्यनुमितिर्भवति । तथैव योग्यानुपलब्ध्या क्षित्यादौ शरीरादिमत्कर्तृकत्वाभावे सिद्धे सकर्तृकत्वव्याप्यकार्यत्वहेतुनैव शरीरादिमद्भिन्नकर्तृकत्वं सिद्ध्यतीति तार्किकाणामाशय: ।[१३] तत् खण्ड्यते 'तृणादिमर्मरीभाव:' इति ग्रन्थेन ।

अयं भाव: - 'हिमं शीतेतरवह्न्यभाववद्' इति विशेषबाधज्ञानसहकारेण रूपादिपरावृत्ति-रूपमर्मरीभावहेतुत्वनिष्ठाग्निनिरूपितव्याप्तिज्ञानात् 'हिमं शीताग्निमत्' इत्यनुमितिप्रसङ्गभिया विशेषबाधसहकारेण

International Journal of Research in Social Sciences
Vol. 8 Issue 10, October 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

सामान्यधर्मावच्छिन्ननिरूपितव्याप्तिज्ञानस्य बाधितेतरविशेषानुमापकत्वं न स्वीकर्तव्यमिति ।

अत्र 'रत्नपेटिकायाम्' नवीनतार्किकप्रक्रियाविस्तरेण निरूपिता । पर्वतादौ महानसीय-वह्निवत्तानिश्चयरूपस्य विशेषबाधस्य सत्वेऽपि वह्नित्वावच्छेदेन महानसीयत्ववत्तानिश्चयदशायां महानसीयेतरवह्निमान्नित्यनुमितिर्न जायते । एवं काञ्चनमयेतरवह्न्यभाववान्निति विशेषबाधसत्त्वेऽपि वह्नित्वावच्छेदेन काञ्चनमयेतरत्वनिर्णयदशायां काञ्चनमयवह्निमान्नित्यनुमिति र्न जायते । अतो विशेषबाधसहायेन बाधितेतरविधेयकानुमितिस्थले तत्प्रतिबन्ध-निर्णयविरहोऽपेक्षित एव । महानसीयेतरवह्निमान् इत्यनुमितिं प्रति वह्नित्वावच्छेदेन महानसीयत्वज्ञानं प्रतिबन्धकम् । अत एव काञ्चनमयेतरवदन्याभाववान् पर्वत: इति बाधज्ञान-सहायेन वह्ने: काञ्चनमयत्वे लाघवमिति लाघवज्ञानसहायेन वा पर्वते वह्निसाधने काञ्चनमयत्वा-भाववद्वह्नेर्बाधित्वं नैयायिकैरुक्तम् ।[१४]

एवञ्च यथा हिमं शीतेतरवह्न्यभाववदिति विशेषबाधसत्त्वेऽपि जगति क्वचिदपि शीतवह्ने-रदृष्टचरत्वेन वह्नित्वावच्छेदेन शीतेतरत्वनिर्णयरूपबाधवशात् 'हिमं शीतवह्निमत्' इत्यनुमितिर्न जायते तथैवाङ्कुरादिषु शरीरादिमत्कर्तृकत्वाभावनिर्णयरूपविशेषबाधसत्त्वेऽपि शरीरादि-रहितकर्तु: क्वचिदप्यदृष्टचरत्वेन कर्तृत्वावच्छेदेन शरीरादिमत्त्वनिर्णयरूपबाधवशान्न शरीरादि-मद्भिन्नकर्तृकत्वानुमिति: सम्भवतीति ।

अपि च महानसीयवह्न्यभाववान् पर्वत इति निश्चयदशायां यदा धूमादीना महानसीयेतर-वह्नित्वावच्छिन्नप्रकारकानुमिति: तदा महानसीयेतरवह्न्याभावविशिष्टधूमत्वावच्छिन्न-व्याप्तिज्ञानादेव तादृशानुमितिर्जायते इति स्वीक्रियते । उक्तव्याप्तिज्ञानस्योक्तजनकतया: क्लृप्तत्वात्, तदानीं तादृशव्याप्तिज्ञानस्य सम्भवाच्च । अत एतत् सिद्धं यत् सामान्यधर्मावच्छिन्ननिरूपितव्याप्तिज्ञानात् तज्ज्ञाने अगृहीतधर्मप्रकारकानुमिते: स्वीकार: नोचित: । तथा च प्रकृतानुमानेन जायमानानुमितौ कर्तरि शरीरादिमद्भिन्नत्वस्य ज्ञानादौ नित्यत्वस्य च भानासम्भवात् तार्किकेष्टसिद्धिर्न भवतीति ।[१५] अत्र आचार्यै:–

परिशेषानुमानस्याप्यन्वयित्वे समा गति: ।
केवलव्यतिरेकी तु परस्तान्निरसिष्यते ।।[१६] इत्युक्तम् ।

अयं भाव: – कार्यत्वहेतुना कर्तु: सिद्धि: शरीरादिमत्त्वेनैव भवति । घटादिषु सपक्षेषु तथैव व्याप्तेर्गृहीतत्वात् । एवञ्च अनुमानसिद्धमीश्वरमनूद्य तत्र अशरीरत्वविधानमशक्यमुप-जीव्यानुमानविरोधात् इति ।

परिशेषानुमानस्येति श्लोकार्थस्त्वेवम्- अङ्कुरादिकं शरीरादिमत्कर्तृकत्वाभावविशिष्ट-सकर्तृकत्वात् अशरीरकर्तृकमिति भवता साधनीयम् । तत्र हेतुशरीरप्रविष्ट: शरीरादिमत्कर्तृक-त्वाभाव: किंरूप इति विविच्यते । किमस्मदात्मकशरीरादिमत्कर्तृकत्वाभाव: उत शरीरादि-मत्कर्तृकत्वसामान्याभावो वा ? साध्यमपि किमस्मदादिभिन्नकर्तृकत्वरूपमुत

शरीरिसामान्यभेद-वत्कर्तृकत्वरूपम् ।[१७]

तत्रास्मदाद्यकर्तृकत्वाभावसहितसकर्तृकेन हेतुना विश्वामित्रादिसृष्टवस्तुविशेषदृष्टान्तेना-स्मदादिभिन्नकर्तृकत्वं यदि साध्यते । तदा सपक्षदृष्टव्याप्त्या शरीरादिमत्कर्तृकत्वमेव सिद्ध्येदिति कार्यत्वलिङ्गकानुमानतुल्यत्वमेव । यदि शरीरादिमत्कर्तृकत्वसामान्याभावसहितसकर्तृकत्वहेतुना अस्मदादिभिन्नकर्तृकत्वं शरीरादिमत्त्वावच्छिन्नभेदवत्कर्तृकत्वं वा साध्यते । तदा केवलव्यतिरेकी निरसनेन तन्निरसनं भविष्यति ।[१८]

नन्वस्मिन्ननुमाने साध्यशरीरप्रविष्ट: कर्ता अपि निरूपयितुं न शक्यते । अत्र विकल्प:। सकर्तृकमित्यत्र उपादानादिसमस्तकारणविषयकज्ञानादिमान् कर्तृतया विवक्षितो वा कतिपयविषयज्ञानादिमान् कर्तृतया विवक्षितो वा अथवा सामान्यत: ज्ञानादिमान् कर्तृतया विवक्षितो वा इति ।[१९]

तस्यार्थस्तु किं स्वनिरूपितकारणताश्रययावद्विषयकज्ञानादिमज्जन्यत्वमत्र साध्यतया विवक्षितमुत स्वनिरूपितकारणताश्रयविषयकज्ञानादिमज्जन्यत्वम् । अहोस्वित् ज्ञानाद्यजन्यत्वमिति ।

स्वनिरूपितकारणताश्रययावद्विषयकज्ञानादिमज्जन्यत्वरूपसाध्यस्य कुत्रचित् प्रसिद्धत्वे तादृशसाध्याभाववति घटादौ कार्यत्वरूपहेतो: विद्यमानत्वात् व्यभिचार: । तादृशसाध्यस्य कुत्राप्य प्रसिद्धत्वे साध्याप्रसिद्धि: । इदञ्च साध्यमप्रसिद्धमेव । नहि कुलालादय: घटादिहेतुभूतमदृष्टे-श्वरादिकं सर्वमपि जानन्ति । यदि

स्वनिरूपितकारणताश्रयविषयकज्ञानादिमज्जन्यत्वं साध्यं तदा जीवैरेव सिद्धसाधनात् अतिरिक्तेश्वरासिद्धि: । एवं ज्ञानादिमज्जन्यत्वमिति तृतीयपक्षेऽपि सिद्धसाधनमेव दोष: ।[२०]

न च उपादानगोचरापरोक्षज्ञानमेव कर्तृत्वोपयोगि, अस्मदादिषु तदसम्भवात् नाहमङ्कुरादिकं करोमि इति प्रत्यक्षबाधाच्च अस्मदादिषु कर्तृत्वं तु न सम्भवतीति वाच्यम् 'विश्वामित्रादि' न्यायेन प्रकृष्टादृष्टशालिनि जीवे तत्साक्षात्कारसम्भवात् । उक्तञ्च 'अधिकरण-सारावल्याम्' आचार्यै: अनुमितौ लघुत्वादनुमितिवशत: कर्मजैश्वर्ययुक्ते विश्वामित्रादिनीत्या स्फुरति विभुमिहासूत्रयच्छास्त्रवेद्यम् इति ।

न च द्रव्याणुकं सकर्तृकं कार्यत्वात् इत्यनुमानेन द्रव्याणुककर्तृत्वेन ईश्वरसिद्ध्यतीति वाच्यम्, अदृष्टद्वारा तत्कर्तृत्वस्यापि जीवे सम्भवात् ।

टिप्पणी

१. न्यायकुसुमाञ्जलि: ५/२

२. न्यायसिद्धाञ्जनम्, रत्नपेटिकाव्याख्या, पृ. ३२९

३. न्यायसिद्धाञ्जनम्, श्लो. ८२

४. न्या.सि.रं, पृ. ३२९

५. न्या.स. श्लो. ८२

६. न्या.सि.रं, पृ. ३३०-३३१

७. न्या.स. श्लो. ८४

८. न्या.स. श्लो. ८५

International Journal of Research in Social Sciences
Vol. 8 Issue 10, October 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell’s Directories of Publishing Opportunities, U.S.A

९. न्या.सि.र, पृ. ३३३

१०. न्या.सि.र, पृ. ३३३

११. न्या.स. श्लो. ८७

१२. न्या.सि.र, पृ. ३३३

१३. न्या.सि.र, पृ. ३३१

१४. न्या.सि.र, पृ. ३३४

१५. न्या.सि.र, पृ. ३३४

१६. न्या.सि.र, पृ. ३३४

१७. न्या.सि.र, पृ. ३३१

१८. न्या.सि.र, पृ. ३३२

१९. न्या.सि., पृ. ३३४

२०. न्या.सि.र, पृ. ३३४

—०—

प्राध्यापक:, नव्यन्यायविभाग:
श्रीसदाशिवपरिसर:, पुरी